कुली ६ राष्ट्रिका ७ स्थूलकण्टा ८ भण्टाकी ९ महोटिका १० बहुपत्री ११ कण्टतनुः १२ कण्टालुः १३ कटुफला १४ डोरली १५ वनवृन्ताकी १६। इति राजनिर्घण्टः॥ सिंही १७ प्रसहा १८ रक्तपाकी १९ लताबृहतिका २०। इति रत्नमाला॥ अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। वातज्वरारोचकामकासश्वासहृद्रोगनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"बृहती पाचनी सोष्णा ग्राहिणी वातनाशिनी॥"

इति राजवल्लभः॥ *॥

महती। इत्यमरः॥ (इयन्तु नारदस्य वीणा। केचित्तु विश्वावसोर्गन्धर्व्वराजस्य वीणां बृहतीमाहुः। तथा च।

"विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती।
महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपी॥"

इति माघटीकायां मल्लिनाथधृतवैजयन्ती। १। १०॥ *॥) उत्तरीयवस्त्रम्। वारिधानी। वाक्॥ कण्टकारी। इति मेदिनी॥ (मर्म्मस्थानविशेषः। यथा, सुश्रुते। ३। ६।

"स्तनमूलादुभयतः पृष्ठवंशस्य बृहती नाम तत्र शोणितातिप्रवृत्तिनिवृत्तिनिमित्तैरुपद्रवैर्म्रियते॥") छन्दोभेदः। स तु नवाक्षरपादः। यथा,—

"उक्तात्युक्ता तथा मध्या प्रतिष्ठान्या सुपूर्व्विका।
गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च॥

इत्यादि। तद्भेदानाह। बृहती नवाक्षरा यथा, भुजगशिशुसृता नौ मः।

हृदतटनिकटक्षोणौ भुजगशिशुसृता यासीत्।
मुररिपुदलिते नागे व्रजजनसुखदा साभूत्॥

पुनैतेवं शम्भुप्रभृतिषु पाठः। अतैव्येवमाधुनिकाः पठन्ति। स्यान्मणिमध्यं चेद्भभसाः।

कालियभोगाभोगगतस्तन्मणिमध्यस्फीतरुचा।
चित्रपदाभो नन्दसुतश्चारु ननर्त्त स्मेरमुखः॥
मजरैर्भुजङ्गसङ्गता।
तरला तरङ्गरिङ्गितैर्यमुना भुजङ्गसङ्गता।
कथमेतु वत्सचारकश्चपलः सदैव तां हरिः॥"

इति छन्दोमञ्जरी॥

बृ(वृ)हतीपतिः, पुं, (बृहतीनां वाचां पतिः।) बृहस्पतिः। इति हेमचन्द्रः॥

बृ(वृ)हत्, त्रि, (बृंह वृद्धौ + "वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च।" उणा० २।८४। इति अतिप्रत्ययेन निपातनात् साधु।) महत्। इत्यमरः॥ (यथा, माघे। २। १०।

"बृहत्सहायः कार्य्यान्तं क्षोदीयानपि गच्छति।
संभूयाम्भोधिमभ्येति महानद्या नगापगा॥")

बृ(वृ)हत्कः, त्रि, (बृहत्प्रकारः। बृहत् + "चञ्चद्बृहतोरुपसंख्यानम्।" ५।४।३। इत्यस्य वार्त्तिकोक्त्या कन्।) बृहत्। बृहच्छब्दात् कन्प्रत्ययेन निष्पन्नमिदम्॥

बृ(वृ)हत्कन्दः, पुं, (बृहत् कन्दं यस्य।) गृञ्जनः। इति रत्नमाला॥ विष्णुकन्दः। इति राजनिर्घण्टः॥

बृ(वृ)हत्कालशाकः, पुं, (बृहन् महान् कालशाकः।) शोथजित्। इति त्रिकाण्डशेषः॥ बृहत्कालकासुन्दिया इति भाषा॥

बृ(वृ)हत्काशः, पुं, (बृहन् काशः।) खड्गटः। इति हारावली॥ खागड़ा इति भाषा॥

बृ(वृ)हत्कुक्षिः, त्रि, (बृहन् कुक्षिर्यस्य।) तुन्दिलः। इत्यमरः॥

बृ(वृ)हत्तालः, पुं, (बृहन् तालः।) हिन्तालः। इति राजनिर्घण्टः॥

बृ(वृ)हत्तिक्ता, स्त्री, (बृहन् तिक्तो यस्याः।) पाठा। इति राजनिर्घण्टः॥

बृ(वृ)हत्तृणः, पुं, वंशः। इति शब्दचन्द्रिका॥ (क्वचित् क्लीवेऽपि दृश्यते॥)

बृ(वृ)हत्त्वक्, [च्] पुं, (बृहती त्वक् यस्य।) सप्तच्छदवृक्षः। इति रत्नमाला॥ छातियान् इति भाषा॥

बृ(वृ)हत्पत्रः, पुं, (बृहत्पत्रं यस्य।) हस्तिकन्दः। इति राजनिर्घण्टः॥

बृ(वृ)हत्पत्रा, स्त्री, (बृहत्पत्रं यस्याः।) त्रिपर्णिका। इति राजनिर्घण्टः॥

बृ(वृ)हत्पाटलिः, पुं, धुस्तूरः। इति त्रिकाण्डशेषः॥

बृ(वृ)हत्पादः पुं, (बृहन् पादो यस्य।) वटवृक्षः। इति शब्दचन्द्रिका॥

बृ(वृ)हत्पारेवतं, क्ली, (बृहत् महत् पारेवतम्।) महापारेवतम्। इति राजनिर्घण्टः॥

बृ(वृ)हत्पाली, [न्] पुं, वनजीरः। इति राजनिर्घण्टः॥

बृ(वृ)हत्पीलुः, पुं, (बृहन् पीलुः।) महापीलुः। इति राजनिर्घण्टः॥

बृ(वृ)हत्पुष्पी, स्त्री, (बृहत् पुष्पं यस्याः। ङीष्।) घण्टारवा। इति जटाधरः॥

बृ(वृ)हत्फलः, पुं, (बृहत् फलं यस्य।) चचेण्डा। इति राजनिर्घण्टः॥

बृ(वृ)हत्फला, स्त्री, (बृहत् फलं यस्याः।) कटुतुम्बी। महेन्द्रवारुणी। कुष्माण्डी। महाजम्बूः। इति राजनिर्घण्टः॥

बृ(वृ)हदङ्गः, पुं, (बृहदङ्गं यस्य।) मतङ्गजः। इति शब्दचन्द्रिका॥

बृ(वृ)हदम्लः, पुं, (बृहन् अम्लो यस्य।) कर्म्मरङ्गः। इति शब्दचन्द्रिका॥ कामराङ्गा इति भाषा॥

बृ(वृ)हदेला, स्त्री, (बृहती एला।) स्थूलैला। इति राजनिर्घण्टः॥

बृ(वृ)हद्गृहः, पुं, (बृहद्गृहं यस्मिन्।) कारूषदेशः। स तु विन्ध्यपर्व्वतस्य पश्चात् मालवदेशस्य निकटे वर्त्तते। इति हेमचन्द्रः॥ त्रिकाण्डशेषे बृहद्गुह इति पाठः॥

बृ(वृ)हद्गोलं, क्ली, (बृहत् गोलं गोलाकारफलं यस्य।) शीर्णवृन्तम्। इति शब्दचन्द्रिका॥ तरमुज इति भाषा॥

बृ(वृ)हद्दलः, पुं, (बृहद्दलं यस्य।) पट्टिकालोध्रः। हिन्तालः। इति राजनिर्घण्टः॥

बृ(वृ)हद्धलं, क्ली, (बृहत् हलं यस्य।) महालाङ्गलम्। तत्पर्य्यायः। हलिः २। इति त्रिकाण्डशेषः॥

बृ(वृ)हद्बीजः, पुं, (बृहत् बीजं यस्य।) आम्रातकः। इति शब्दचन्द्रिका॥

बृ(वृ)हद्भट्टारिका, स्त्री, दुर्गा। इति शब्दमाला॥

बृ(वृ)हद्भानुः पुं, (बृहन् भानू रश्मिर्यस्य।) अग्निः। (यथा, महाभारते। ३। २२०। ८।

"तपसश्च मनुं पुत्रं भानुञ्चाप्यङ्गिराः सृजत्।
बृहद्भानुन्तु तं प्राहुर्ब्राह्मणा वेदपारगाः॥")

चित्रकवृक्षः। इत्यमरः॥ (सत्यभामापुत्रः। यथा, भागवते। १। ६१। १०।

"चन्द्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः॥"

सत्रायणपुत्रः। यथा, भागवते। ८। १३। ३५।

"सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः॥"

पृथुलाक्षस्य पुत्रः। यथा, भागवते। ९। २३। ११।

"चतुरङ्गो रोमपादात् पृथुलाक्षस्य तत्सुतः।
बृहद्रथो बृहत्कर्म्मा बृहद्भानुश्च तत्सुताः॥"

बृहद्रश्मिविशिष्टे, त्रि। यथा, ऋग्वेदे। १। ३६। १५।

"बृहद्भानो यविष्ठ्य॥"

"हे अग्ने हे बृहद्भानो बृहन्तो भानवो यस्य तादृश।" इति तद्भाष्ये सायणः॥)

बृ(वृ)हद्रथः, पुं, (बृहन् रथो यस्य।) इन्द्रः। यज्ञपात्रम्। मन्त्रविशेषः। सामवेदांशः। नदीविशेषे, स्त्री। इति केचित्॥ (तिग्मपुत्रः। यथा, मात्स्ये। ५०। ८५।

"तिग्माद्बृहद्रथो भाव्यो वसुदामा बृहद्रथात्॥"

शतधन्वपुत्रः। यथा, भागवते। १२। १। १३।

"शतधन्वा ततस्तस्य भविता तद्बृहद्रथः॥"

देवरातपुत्रः। यथा, भागवते। ९। १३। १५।

"तस्माद्बृहद्रथस्तस्य महावीर्य्यः सुधृत्पिता॥"

तिमिराजपुत्रः। यथा, तत्रैव। ९। २२। ४३।

"तिमेर्बृहद्रथस्तस्मात् शतानीकः सुदासजः॥"

पृथुलाक्षस्य पुत्रः। यथा, तत्रैव। ९। २३। ११।

"बृहद्रथो बृहत्कर्म्मा बृहद्भानुश्च तत्सुताः॥"

प्रभूतरथे, त्रि। यथा, ऋग्वेदे। ५। ८०। २।

बृहद्रथा बृहती विश्वमिन्वा।"

"बृहद्रथा प्रभूतरथा।" इति तद्भाष्ये सायणः॥)

बृ(वृ)हद्रावी, [न्] पुं, (बृहद्रतिशयं द्रवतीति। द्रु + णिनिः।) क्षुद्रोलूकः। इति राजनिर्घण्टः॥

बृ(वृ)हद्वल्कः, पुं, (बृहद्वल्कः वल्कलं यस्य।) पट्टिकालोध्रः। इति राजवल्लभः॥

बृ(वृ)हद्वातः, पुं, (बृहन् वातो यस्मात्।) अक्षरीहरः। इति रत्नमाला॥ देधान इति भाषा॥

बृ(वृ)हद्वारुणी, स्त्री, महेन्द्रवारुणी। इति राजनिर्घण्टः॥

बृ(वृ)हन्नलः, पुं, (बृहन् नलः।) महापोटगलः। इति मेदिनी॥ अर्ज्जुनः। यथा,—

"पार्थः किरीटी गाण्डीवी गुडाकेशो बृहन्नलः।
अर्ज्जुनः फाल्गुनो जिष्णुर्विजयश्च धनञ्जयः॥